**संस्कृत वार्ता:**

**दिनाङ्क : 31/07/2026**

**सायम : 06:20**

<u>**आदौ मुख्यवार्ता:**</u>

· लोक-सभायाम् 'जन्म-मृत्योः पञ्जीकरणम् संशोधनविधेयकः सर्वसम्मत्या पारितंगतः।

· विविधान् विषयान् आश्रित्य प्रतिपक्षस्य उग्र-प्रतिरोध-कलकलेन संसदः उभे सदने स्थगिते।

· प्रधानमन्त्रिणः आपत्तिजनक-सामग्री-प्रसारात् 'मेटा-इण्डिया' अधिकारिणां विरुद्धम् हैदराबाद-आरक्षिभिः प्राथमिकी पञ्जीकृता।

· विरोध-प्रदर्शने आहतानां देहली-आरक्षिणां परिजनैः न्याय-याचना कृता, आरक्षिणां सुरक्षा-संवर्धनाय च प्रशासनं निवेदितम् ।

· पाक-अधिकृत-जम्मू-काश्मीरे प्रदर्शनकारिणाम् उपरि नृशंस-अत्याचारः सम्वृत्तः । प्रदर्शनकारिणः च निहताः ।

· **अपि च,**

· ओडिशा-राज्ये जलप्लावनस्य स्थितिः अद्यापि अतीव गम्भीरा चिन्तास्पदा च वर्तते; त्रयोदश जनपदानां खण्डेषु प्रायः अष्ट-लक्षं जनाः अस्मात् आप्लवात् भृशं प्रभाविताः ।

**<u>अथ वार्ता: विस्तरेण</u>**

**<u>लोकसभा-स्थगित</u>**

एन.ई.एफ.टी. विषयम् अधिकृत्य छात्राणां विरोध-प्रदर्शनावधौ आरक्षि-बलैः कृतं कार्याचरणं समेत्य अन्यान् विषयान् आदाय प्रतिपक्षस्य भीषण-कोलाहलानन्तरं संसदः उभयोः सदनयोः कार्यजातं अद्ययावत् स्थगितम् । प्रथम-स्थगनान्तरं यदा मध्याह्ने द्वादश-वादने लोक-सभायाः उपवेशनं पुनः समारब्धम्, तदा पीठासीनः दिलीप-सैकिया 'जन्म-मृत्यु- संशोधन विधेयकम्-२०२६' विचारणार्थम्, पारणार्थञ्च गृहीतवान्। गृह-राज्यमन्त्री नित्यानन्द-रायः प्रतिपक्षस्य कोलाहलाभ्यन्तरे एव विधेयकं संसद्-पटले उपस्थापितवान्। एषः विधेयकः चर्चां विनैव कोलाहलाभ्यन्तरे एव सदने पारितः । अत्रान्तरे संसदीय-कार्य-मन्त्री किरेन-रिजिजू-महोदयः चर्चायाम् भागं न ग्रहीतु प्रतिपक्षस्य कट्वालोचनाम् अकरोत्। मन्त्री प्रोक्तवान् यत् मया काङ्ग्रेस्-प्रमुख-प्रतिपक्षेभ्यः अस्य गुरुतर-विधेयकस्य विचारणाय पुनः-पुनः साग्रहं निवेदितम् आसीत्।

**<u>राज्यसभा स्थगित</u>**

राज्य-सभा अपि आगामि-सोमवासरं यावत् स्थगिता । प्रातः एकादश-वादने यदा राज्य-सभायाः उपवेशनम् समवेतम्, तदा अनेकैः केन्द्रीय-मन्त्रिभिःपत्राणि संसद्-पटले उपस्थापितानि । तदनन्तरं पीठासीनेन सभापतिना सी. पी. राधाकृष्णन्-वर्येण शून्य-कालः प्रारब्धः, यस्मिन् सदस्याः आत्ययिकान् लोक-हित-विषयान् संसद्-पटले अस्थापयन्। किन्तु प्रतिपक्षस्य सदस्याः स्वकीय-याचनाः आदाय उच्चैः उद्घोषणैः सह विरोध-प्रदर्शनम् प्रारब्धवन्तः। सदने अविराम-कोलाहले जाते सति, सभापतिः सदनस्य कार्याचरणं स्थगितवान्॥

**हैदराबाद-साइबर**

हैदराबाद-नगरस्य साइबर्-आरक्षिभिः फ़ेसबुक-इन्स्टाग्राम-पटलयोः प्रधानमन्त्रिणः नरेन्द्र-मोदिनः विरुद्धम् आक्षेपार्ह-सामग्र्याः प्रसारात् 'मेटा-इण्डिया' अधिकारिणां विरुद्धं प्राथमिकी पञ्जीकृता। भारतीय-जनता-दलस्य सामाजिक-अन्तर्जालीय-विभागस्य परिवादम् आधारिकृत्य एतत) अभवत्। साइबर्-अपराध-विभागस्य आरक्ष्यायुक्तः अरविन्द-बाबु-महोदयः अकथयत् यत् प्रकरणस्यास्य गहन-अन्वेषणं प्रचलति। तेलङ्गाना-भाजपा-दलेन उक्तं यत् 'भाषण-स्वातन्त्र्यं चरित्र-हननस्य अनुज्ञापत्रं न भवितुम् अर्हति' इति॥

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम इदानीम आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**<u>दिल्ली पुलिस</u>**

दिल्ल्याः जन्तर-मन्तर-क्षेत्रे जुलाई-मासस्य त्रिंशद् दिनाङ्के विरोध-प्रदर्शनावधौ आहतानां दिल्ली-आरक्षि-बलानां परिजनैः अद्य नवदिल्ल्यां वार्ताहर-सम्मेलनं आहूतम्। अस्मिन् अवसरे तैः आरोपः कृतः यत् प्रदर्शन-काले आरक्षि-अधिकारिणामुपरि हिंसा कृता। परिजनैः उक्तं यत् अग्रिम-पङ्क्तौ नियोजिताः आरक्षिणः जन-समूहे विद्यमानैः उपद्रवि-तत्त्वैः परिवेष्टिताः, प्रस्तर-खण्डैः प्रहृताः , कायिक-उत्पीडनेन च ताडिताः। अस्मिन् उपद्रवे अनेके आरक्षिणः गम्भीर-रूपेण व्रणिताः अभवन्। परिजनैः प्रशासनं प्रति साग्रहं निवेदितम् यत्- अस्मिन् आक्रमणे सल्लग्नानां दोषिणां विरुद्ध्य कठोर-कार्याचरणं सुनिश्चितं भवेत्, तथा सार्वजनिक-प्रदर्शनेषु नियोजितानां आरक्षिणां सुरक्षा-व्यवस्था सुदृढा क्रियेत। अत्रान्तरे एकस्य सहायक-आरक्षकस्य पुत्रेण प्रोक्तं यत् अस्यां हिंसायां तस्य पितुः शिरसि गम्भीरा क्षतिः अभवत्।

**<u>पीओके-आंदोलनम</u>**

पाक-अधिकृत-जम्मू-काश्मीर-क्षेत्रेषु अस्य सप्ताहस्य प्रारम्भे पाक-सुरक्षा-बलैः नागरिकाणाम् उपरि अत्याचारस्य अनन्तरम् प्रतिरोध-प्रदर्शनं अश्रान्तं प्रचलति। अस्यां हिंसायां चत्वारिंशतोप्यधिकाः जनाः पंचत्वे विलीनाः। स्थानीय-प्रशासनेन मौलिक-अधिकारान् याचमानाः महिला-प्रदर्शनकारिण्यः लक्षीकृताः। अस्य दुराचारस्य विरोधे उच्चैः आक्रन्दन्तीनां रावलाकोट-मीरपुर-क्षेत्रयोः एकत्रितानां महिलानाम् उपरि पाक-सुरक्षा-बलैः गोलिका-प्रहाराः कृताः। सामाजाक-माध्यमेषु प्रसारिताः अनेकाः दृश्य-श्रव्य-सञ्चिकाः दर्शयन्ति यत् 'कोटली' इत्यत्र शान्तिपूर्ण-प्रदर्शनाभियाने आरक्षिणां गोलिका-

प्रहारात् महिलाः प्राण-रक्षायै इतस्ततः धावन्ति। नागरिक-सङ्घानाम् अवैधीकरणं अभिव्यक्ति-स्वातन्त्र्यस्य अत्यन्तं उल्लङ्घनम् इति संयुक्त-राष्ट्र-सङ्घस्य मानवाधिकार-प्रवक्ता जेरेमी-लॉरेंस अवोचत्।

**<u>मौसम</u>**

भारतीय ऋतु -विज्ञान-विभागेन अद्य गुजरात-राज्ये तथा मध्यमहाराष्ट्रे अतिवृष्टेः सम्भावनां वीक्ष्य 'रक्त-वर्णीया संचेतना प्रख्यापिता। अद्य अरुणाचल-प्रदेशस्य, पूर्व-राजस्थानस्य, कर्नाटकस्य, केरलस्य, माहे-क्षेत्रस्य, पञ्जाबस्य, पश्चिम-मध्यप्रदेशस्य च केषुचित् भागेषु अति- वृष्टिः भवितुम् अर्हतीति अवधेयम् ।

**<u>ओडिशा-बाढ</u>**

ओडिशा-राज्ये आप्लव-स्थितिः अद्यापि सुगम्भीरा आशङ्कास्पदा च अस्ति। प्रदेशस्य बहुषु क्षेत्रेषु सेतु-विदारणेन नदीनां जलाप्लवेन च लोक-यात्रा सञ्जाताकुला। यद्यपि उपरितन-क्षेत्रेषु वर्षणस्य निवृत्त्या महानदी-प्रवाहः क्रमेशः स्थिरतां भजते, तथापि वैतरणी-नद्याः तदुपनदीनाञ्च आप्लावेन नूतनाः आशङ्काः प्रादुर्भूताः। अस्मद्-वार्ताहरस्य वृत्तान्तानुसारम् त्रयोदश जनपदानां खण्डेषु प्रायः अष्ट-लक्षं जनाः अस्मात् आप्लवात् प्रभाविताः अभवन्। प्रशासनस्य अधिकारिणः आपद्-रक्षण-सहायता-कार्याणि निरीक्षणञ्च सम्प्रति तीव्र-गत्या सञ्चालयन्ति।

**<u>झारखण्ड</u>**

झारखण्ड-राज्यस्य भाजपेतिदलस्य-सांसदाः अद्य संसदभवनस्य महात्मा-गान्धी-प्रतिमायाः पुरतः कथितस्य जे. पी. एस्. सी. गोप्यताभंग परीक्षा पत्र प्रकरणे सी. बी.

आई. अन्वेषणं याचितवन्तः। झारखण्ड्-राज्ये जे. एम्. एम्-नेतृत्वस्य सर्वकारस्य नेतृत्वे जे. पी. एस्. सी. अनधिकृत परीक्षा पत्र प्रकाशनेन -सहैव अनेकाः परीक्षा पत्र प्रकाश-घटनाः सूचिताः इति केन्द्रीय-महिला-बाल-विकास-मन्त्रिणा तथा कोडरमा-मण्डलस्य भाजपा-सदस्या अन्नपूर्णा देवी इत्यनया अद्य आरोपः कृतः।

**॥ इति वार्ता: ॥**